# 12. अस्माकम् आहारः



अस्मिन् संसारे सर्वे प्राणिनः आहारं गृह्णन्ति । जीवनरक्षार्थम् आहारस्य अतीव आवश्यकता भवति ।

मानवस्य आहारः कीदृशः भवेत् इति विषये अस्माकं ऋषयः मुनयः वैद्याश्च उपदिशन्ति यत् बाल्यकालात् वृद्धावस्थापर्यन्तम् अस्माकम् आहारः सन्तुलितः भवेत् । सद्यः प्रसूतः शिशुः मातुः दुग्धमेव पिबति । मातुर्दुग्धं पौष्टिकं भवति । पौष्टिक-आहारेण शिशवः संवर्ध्यन्ते । सर्व-जनेभ्यः आहारे पौष्टिकफलानां महती आवश्यकता वर्तते अन्यथा ते दुर्बलाः अशक्ताश्च भविष्यन्ति ।

अस्माकम् आहारः उष्णम्, स्निग्धः, स्वादयुक्तः च भवेत् । मानवः मितभोगी भवेत् अन्यथा अजीर्णं भविष्यति, वैद्याः कथयन्ति-'अजीर्णमन्नं रोगस्य कारणमस्ति । प्रसन्नचित्तेन स्वच्छस्थाने संयमेन उपविश्य नात्यधिकं नातिद्रुतम् आहारं कुर्यात् ।

चणकः तण्डुलः, गोधूमः, द्विदलं, यवः, आढकी, मुद्गः, माषः इत्यादीनि अन्नानि सन्ति । कूष्माण्डकः, कर्कटी, अलाबूः, मूलिका, आम्रम्, इक्षुः, कदलीफलं इत्यादीनि शाकफलानि सन्ति । नवनीतं दुग्धं, घृतं, तक्रं, दधि इत्यादिकं पेयम् अस्ति । एते सर्वे शाकाहारि-मानवानाम् आहाराः ।

बालानां कृते दुग्धम् अमृतं कथ्यते । घृतं तु बलवर्धकम् । मधु रक्त-शोधनं करोति ।श्रीफलम् आमलकः, आमरूद्यः स्वास्थ्यं रक्षन्ति, उदर-शोधनं बलवर्धनं च कुर्वन्ति । उक्तञ्च-आहार-शास्त्रे "शाकाहारी मनुष्यः दीर्घायुः भवति ।"

## शब्दार्थाः

| | | |
|---|---|---|
| सर्वे प्राणिनः | - | सभीप्राणी |
| गृह्णन्ति | - | ग्रहण करते हैं |
| प्राणरक्षार्थम् | - | प्राण रक्षा के लिये |

| | | |
|---|---|---|
| कीदृशः | - | कैसा |
| उपदिशन्ति | - | उपदेश देते हैं |
| यत् | - | कि |
| सद्यः प्रसूतः | - | तुरन्त पैदा हुआ |
| शिशुः | - | बालक |
| एव | - | ही |
| पौष्टिकम् | - | बल बढ़ाने वाला |
| संवर्धयन्ते | - | बढ़ते हैं |
| अशक्ताः | - | शक्तिहीन |
| उष्णम् | - | गर्म, ताजा |
| स्निग्धः | - | चिकना |
| स्वादयुक्तः | - | स्वादिष्ट |
| मितभोगी | - | कम खाने वाला |
| अजीर्णम् | - | अपच |
| संयमेन | - | संयमपूर्वक |
| उपविश्य | - | बैठकर |
| अतिद्रुतम् | - | बहुत शीघ्र |
| न | - | नहीं |
| चणकः | - | चना |
| तण्डुलः | - | चावल |
| गोधूमः | - | गेहूं |
| द्विदलम् | - | दाल |
| यवः | - | जौ |
| आढकी | - | अरहर की दाल |
| मुद्गः | - | मूंग |
| माषः | - | उड़द |
| इक्षुः | - | ईख |
| कूष्माण्डकः | - | कुम्हड़ा |
| अलाबूः | - | आलू |
| मूलिका | - | मूली |

| | | |
|---|---|---|
| कदलीफलम् | - | केला |
| नवनीतम् | - | मक्खन |
| तक्रम् | - | मही(मट्ठा) |
| दधि | - | दही |
| पेयम् | - | पीने योग्य |
| एते | - | ये |
| कृते | - | के लिये |
| कथ्यते | - | कहा जाता है |
| रक्तशोधनम् | - | खून को शुद्ध करना |
| श्रीफलम् | - | नारियल |
| आमलकः | - | आंवला |
| आमरूद्यः | - | अमरूद |
| उक्तम् | - | कहा गया है |
| च | - | और |

## संधि-विच्छेद

| | | |
|---|---|---|
| वैद्याश्च | - | वैद्याः + च |
| मातुर्दुग्धम् | - | मातुः + दुग्धम् |
| फलादीनाम् | - | फल + आदीनाम् |
| अशक्ताश्च | - | अशक्ताः + च |
| नात्यधिकम् | - | न + अतिअधिकम् |
| नातिद्रुतम् | - | न + अतिद्रुतम् |
| इत्यादीनि | - | इति + आदीनि |
| इत्यादिकम् | - | इति + आदिकम् |
| उक्तञ्च | - | उक्तम् + च |
| दीर्घायुः | - | दीर्घ + आयुः |
| भवतीति | - | भवति + इति |

## अभ्यासः

### 1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए-

1. प्राणरक्षार्थं कस्य अतीव आवश्यकता वर्तते ?
2. सद्यः प्रसूतः शिशुः कस्याः दुग्धम् पिबति ?
3. केन आहारेण शिशवः संवर्ध्यन्ते?
4. कः मितभोगी भवेत् ?
5. अजीर्णमन्नं कस्य कारणमस्ति?
6. कः मनुष्यः दीर्घायुः भवति ?

### 2. कोष्ठक में दिये गये शब्दों से रिक्त स्थान भरिये ।

(शिशवः, घृतम्, भवेत्, पेयम्)

1. मानवस्य आहारः कीदृशः .................. ।
2. .................... आहारेण संवर्धन्ते ।
3. दुग्धं, घृतं, तक्रं, दधि इत्यादिकं ............... अस्ति।
4. .................. तु बलवर्धकम् ।

### 3. निम्नलिखित शब्दों का वाक्य प्रयोग कीजिए-

भविष्यन्ति, आहारः, कथयन्ति, भवेत्

### 4. 'अस्मद' (मैं) - सर्वनाम् शब्द की कारक रचना सभी विभक्तियों में लिखिए-

### 5. 'पा' (पिब्) धातु लट्लकार, सभी पुरूष व वचन में काल रचना कीजिए ।

PHRZKV